**Hall Ticket Number**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | | | | | | | | |

**Q.B.No.** 5 1 2 1 4 3

**Booklet Code : C**

**Marks : 100**
**Time : 120 minutes**

**2PS1**

**Signature of the Candidate** **Signature of the Invigilator**

## परीक्षार्थिभ्यः सूचनाः

**(उत्तरदानात् प्राक् सूचनाः सावधानं पठनीयाः)**

1. भवद्भ्यः पृथक् OMR उत्तरपत्रं प्रश्नपत्रपुस्तिकया सह दीयते । OMR पत्रे उत्तराणाम् अङ्कनार्थमपेक्षितविषयाणां लेखनार्थञ्च तत्र दत्ताः सूचनाः पठनीयाः अनुसरणीयाश्च ।
2. प्रश्नपत्रपुस्तिकायाः OMR उत्तरपत्रस्य च कूटसंख्या समाना अस्तीति अभ्यर्थिभिः द्रष्टव्यम् ।
3. **प्रश्नपत्रपुस्तिकायाः उन्मोचनसमनन्तरमेव एते अंशाः अवधेयाः, यथा - (i) प्रश्नपत्रपुस्तिकायाः प्रत्येकस्मिन्नपि पुटे कूटसंख्या (A/B/C/D) समाना स्यात्, (ii) प्रश्नानां क्रमसंख्या (1-100), (iii) पुटानां संख्या, (iv) शुद्धं मुद्रणञ्च ।** यदि प्रश्नपत्रपुस्तिकायाम् उपर्युक्तांशेषु त्रुटिः भवति, तर्हि परीक्षाप्रारम्भात् पञ्चनिमेषेषु निरीक्षकं संसूच्य, प्राक्तनकूटसंख्यायुक्ता नूतनप्रश्नपत्रपुस्तिका स्वीकरणीया ।
4. परीक्षाप्रकोष्ठे चरवाणी, पेजर, गणकयन्त्रम्, घटी, गणितीयपट्टिकाः इत्यादीनि वैद्युतीयोपकरणानि नानुमन्यन्ते ।
5. **प्रत्येकम् अशुद्धम् उत्तरम् अङ्कस्यैकस्य चतुर्थांशम् (¼) अल्पं करिष्यति ।** यदि प्रश्नः उत्तररहितः त्यज्यते चेत् सः प्रश्नः अङ्कस्यैकस्य चतुर्थांशं (¼) नाल्पं करिष्यति ।
6. OMR उत्तरपत्रे प्रश्नसंख्यामनुसृत्य निर्दिष्टप्रश्नस्य शुद्धं समुचितं वा उत्तरं (1), (2), (3) अथवा (4) इति निर्दिष्टे गोलके कृष्णीकरणीयम् । कस्यापि प्रश्नस्य एकाधिकगोलकेषु कृष्णीकरणेन उत्तरमवैधं भवति ।
7. उत्तरस्य परिवर्तनं नानुमतम् ।
8. प्रश्नपत्रपुस्तिकायां प्रदत्ते निर्दिष्टस्थले एव अतिरिक्तकार्यम् (Rough Work) करणीयम् ।
9. OMR उत्तरपत्रं प्रश्नपत्रपुस्तिकाञ्च निरीक्षकाय दत्वा परीक्षाप्रकोष्ठात् बहिः गन्तव्यम् । यदि OMR उत्तरपत्रं न प्रत्यर्प्यते, तर्हि आपराधिक-अभियोगः भवति ।

**अस्यां प्रश्नपत्रपुस्तिकायां शतस्य प्रश्नानां कृते 13 पुटानि, अतिरिक्तकार्याय (Rough Work) पुटद्वयम्, एकं शीर्षकपुटं चाहत्य 16 पुटानि सन्ति ।**

## SPACE FOR ROUGH WORK

**2PS1** **Booklet Code C**

**समयः - होराद्वयम्** **अङ्काः - 100**

**सूचनाः -**

i) प्रत्येकं प्रश्नस्य कृते एकः अङ्कः । **प्रत्येकम् अशुद्धम् उत्तरम् अङ्कस्यैकस्य चतुर्थांशम्** (¼) **अल्पं करिष्यति** ।

ii) **अधोनिर्दिष्टानां प्रश्नानां कृते प्रदत्तेषु विकल्पेषु शुद्धं समुचितं वा विकल्पं चित्वा नील / कृष्णवर्णलेखन्या** (Blue/ Black Ball Point Pen) **पृथक्तया प्रदत्ते** OMR **उत्तरपत्रे निर्दिष्टप्रश्नसंख्यायाः पुरतः विद्यमानेषु गोलकेषु 1, 2, 3** अथवा **4** गोलकं कृष्णीकरणीयम् ।

---

1. यथाक्रमं सज्जीकुरुत ।
   A) सामान्यीकरणम्
   B) प्रयोगः
   C) प्रस्तुतीकरणम्
   D) प्रस्तावना

   (1) B A D C (2) A B C D
   (3) D C B A (4) C D B A

---

2. क स्तम्भ - ख स्तम्भयोर्मेलनं कुरुत ।

| | 'क' | | 'ख' |
|---|---|---|---|
| A) | दृश्यश्रव्यसामग्री | i) | प्रभाविभाषाशिक्षणम् |
| B) | पाठयोजना | ii) | कक्षावैविध्यसम्पादनम् |
| C) | प्रत्यक्षविधिः | iii) | निःसंकोचभाषाभ्यासः |
| D) | भाषाप्रयोगशाला | iv) | यथालक्षणं पाठनम् |

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | ii | iv | i | iii |
| (2) | iv | ii | iii | i |
| (3) | i | iii | ii | iv |
| (4) | iii | i | iv | ii |

---

3. यथाक्रमं स्थापयत ।
   A) गृहकार्यम्
   B) विस्तृतव्याख्या
   C) आदर्शवाचनम्
   D) काठिन्यनिवारणम्

   (1) A B C D (2) B A D C
   (3) C D A B (4) C D B A

---

4. नेदं भाषाशिक्षणस्य सूत्रम् -
(1) सरलात् कठिनं प्रति (2) मूर्तात् अमूर्तं प्रति
(3) दक्षिणतः वामं प्रति (4) ज्ञातात् अज्ञातं प्रति

5. अधोलिखितेषु कीदृशं कौशलम् अन्तिमपर्याये शिक्षणीयम् ?
(1) लेखनकौशलम् (2) भाषणकौशलम्
(3) श्रवणकौशलम् (4) पठनकौशलम्

6. काठिन्यनिवारणाय इयं युक्तिः नास्ति -
(1) पर्यायपदयुक्तिः (2) दण्डान्वययुक्तिः
(3) कोषयुक्तिः (4) वाक्यप्रयोगयुक्तिः

7. पाठयोजनायां गृहकार्यसोपानस्य प्रमुखम् उद्देश्यमस्ति -
(1) पूर्वज्ञानपरीक्षणम् (2) पाठ्यांशस्य विस्तृतबोधनम्
(3) रचनात्मकतायाः विकासः (4) मननशक्तेः विकासः

8. पद्यशिक्षणे विधिरसौ नोपयुज्यते -
(1) सहकारविधिः (2) दण्डान्वयविधिः
(3) निगमनविधिः (4) खण्डान्वयविधिः

9. भण्डार्करविधिरुपयुज्यते -
(1) नाटकशिक्षणाय (2) व्याकरणानुवादशिक्षणाय
(3) गद्यशिक्षणाय (4) अलङ्कारशिक्षणाय

10. लेखनकौशलविकासाय को विधिरधिकम् उपयुज्यते ?
(1) भण्डार्करविधिः (2) शिबिरविधिः
(3) किण्डरगार्टनविधिः (4) जेकाटॉटविधिः

11. दशतयी भवति -
(1) ऋग्वेदः (2) यजुर्वेदः (3) सामवेदः (4) अथर्ववेदः

12. आर्यभाषात्वेन प्रसिद्धा भाषा -
(1) शारदा (2) ब्राह्मी (3) संस्कृतम् (4) देवनागरी

13. संस्कृतग्रामः ‘मत्तूर’ कस्मिन् राज्ये अस्ति ?
(1) कर्णाटकः (2) आन्ध्रप्रदेशः (3) उत्तरप्रदेशः (4) उत्तराखण्डः

14. मेलनं कुरुत ।
A) कल्पः i) निरुक्तम्
B) निघण्टुः ii) शाकटायनः
C) व्याकरणम् iii) अष्टकम्
D) ऋग्वेदः iv) शुल्बसूत्रम्

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | iv | i | ii | iii |
| (2) | iii | iv | i | ii |
| (3) | i | iii | iv | ii |
| (4) | ii | iv | iii | i |

15. किं युग्मं भिन्नम् ?
(1) कालिदासः - भवभूतिः (2) जगन्नाथः - विश्वनाथः
(3) शङ्कराचार्यः - राजेन्द्रप्रसादः (4) कबीरदासः - रहीमः

16. संस्कृतं द्वितीयराजभाषात्वेन अस्ति -
(1) कर्णाटके (2) केरले (3) उत्तरप्रदेशे (4) उत्तराखण्डे

17. ‘अतिस्नेहः पापशङ्की’ इदं सुभाषितं वर्तते -
(1) अभिज्ञानशाकुन्तले (2) कुमारसम्भवे
(3) मालविकाग्निमित्रे (4) रघुवंशे

18. संस्कृतभाषायाः प्राचीनलिपिरस्ति -
(1) देवनागरी (2) ब्राह्मी (3) नेवारी (4) मैथिली

19. एतेषु किं भिन्नम् ?
(1) अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्
(2) उत्तररामचरितम्, मालतीमाधवम्, महावीरचरितम्
(3) बुद्धचरितम्, सौन्दरानन्दम्, शारीपुत्रप्रकरणम्
(4) शिशुपालवधम्, किरातार्जुनीयम्, राघवयादवीयम्

20. संस्कृतभाषायाः वर्गोऽस्ति -
(1) केण्टुंवर्गः (2) शतंवर्गः (3) एशियावर्गः (4) तिब्बतीवर्गः

21. याज्ञवल्क्यानुसारेण पाठदोषाः भवन्ति -
(1) 12 (2) 14 (3) 18 (4) 20

22. भारतसंविधाने संस्कृतस्य चर्चा कस्मिन् परिच्छेदे (Schedule) कृताऽस्ति ?
(1) प्रथमपरिच्छेदे (2) चतुर्थपरिच्छेदे (3) पञ्चमपरिच्छेदे (4) अष्टमपरिच्छेदे

23. माध्यमिकस्तरे संस्कृतशिक्षणस्य उद्देश्यम् इदं भवति -
(1) ग्रहणकौशलयोः विकासः (2) अभिव्यक्तिकौशलयोः विकासः
(3) श्रवण-भाषणयोः विकासः (4) पठन-लेखनयोः विकासः

24. भाषाकौशलाधिगमे कः क्रमः समीचीनः ?
(1) भाषणम्, पठनम्, श्रवणम्, लेखनम् (2) लेखनम्, पठनम्, भाषणम्, श्रवणम्,
(3) पठनम्, लेखनम्, भाषणम्, श्रवणम्, (4) श्रवणम्, भाषणम्, पठनम्, लेखनम्

25. संस्कृते भाषणकौशलसम्पादनाय उपयुक्तः उपागमः -
(1) मनोवैज्ञानिकोपागमः (2) संरचनोपागमः
(3) सम्प्रेषणोपागमः (4) व्याकरणानुवादोपागमः

26. भाषाधिगमाय एतेषु किं कौशलं प्रधानम् ?
(1) पठनम् (2) लेखनम् (3) भाषणम् (4) श्रवणम्

27. संस्कृतभाषाशिक्षणस्य समुन्नतौ विधिरस्ति -
(1) अनुवादविधिः (2) प्रत्यक्षविधिः (3) व्याख्याविधिः (4) टीकाविधिः

28. भाषाकौशलानामधिगमे उपयुक्तः अधिगमसिद्धान्तः -
(1) गेस्टाल्टसिद्धान्तः (2) शास्त्रीयनिबन्धनम् (3) यत्नदोषसिद्धान्तः (4) सामाजिकानुकरणम्

29. छात्राणां भाषाकौशलानि सम्पादयितुम् उपयुक्तः विधिः -
(1) व्याख्याविधिः (2) प्रत्यक्षविधिः (3) अनुवादविधिः (4) परम्परागतविधिः

30. उच्चारणसम्बद्धाः दोषाः अनेन कौशलेन निवारयितुं शक्यन्ते -
(1) लेखनेन (2) पठनेन (3) भाषणेन (4) श्रवणेन

31. संस्कृताधिगमे एतेषु किम् उच्चशिक्षायाः उद्देश्यं नास्ति ?
(1) कण्ठस्थीकरणम् (2) अनुसन्धानक्षमतोपार्जनम्
(3) तुलनात्मकमध्ययनम् (4) पूर्वपक्षमतसमीक्षा

32. रुचेः सिद्धान्तो वर्तते ......
(1) तार्किकः (2) धार्मिकः (3) मनोवैज्ञानिकः (4) दार्शनिकः

33. आदौ विशेषं निश्चितं च उदाहरणं प्रदाय ततः परं शब्दविन्यास-व्याकरण-उच्चारणादीनां साधारणनियमकथनं भवति -
(1) विशेषात् सामान्यं प्रति (2) मनोविज्ञानात् तर्कं प्रति
(3) स्थूलात् सूक्ष्मं प्रति (4) सरलात् कठिनं प्रति

34. संस्कृतभाषायाः अभ्यासे महत्त्वपूर्णां भूमिकां निर्वहति -
(1) संगणकप्रयोगशाला (2) मनोविज्ञानप्रयोगशाला
(3) संगीतप्रयोगशाला (4) भाषाप्रयोगशाला

35. संस्कृतभाषाशिक्षणे भाष्यविधिः उपयुज्यते -
(1) प्राथमिकस्तरे (2) उच्चप्राथमिकस्तरे (3) माध्यमिकस्तरे (4) उच्चकक्षासु

36. संस्कृताध्यापकः छात्राणां वैयक्तिकक्षमताः अभिलक्ष्य स्वतन्त्रवातावरणे पाठयेत् । इदं कथनमस्ति -
(1) मनोगत्यात्मकम् (2) मनोवैज्ञानिकम् (3) प्राविधिकम् (4) मनोदैहिकम्

37. अधोलिखितेषु का सर्जनशीलता ?
(1) काव्यपाठः (2) काव्यरचना (3) निबन्धपाठः (4) अन्त्याक्षरी

38. अधोलिखितेषु असत्यं चिनुत ।
(1) संस्कृते पूर्णाधिकारं सम्पादयितुं केवलं भाषाकौशलमपेक्ष्यते ।
(2) ह्यूरिस्टिकविधिना पद्यशिक्षणं नोपयुज्यते ।
(3) पद्यशिक्षणं भण्डार्करविधिना नोपयुज्यते ।
(4) भाषाशिक्षणे प्रत्यक्षविधिः महत्तमोऽस्ति ।

39. सत्यं वद, धर्मं चर, परोपकारी भव एतादृशं शिक्षणं कीदृशं भवति ?
(1) ज्ञानपरकम् (2) मूल्यपरकम्
(3) शब्दभण्डारवृद्धिपरकम् (4) आत्मविश्वासवर्द्धकम्

40. तुलनात्मकाध्ययनक्षमताविकासः कस्मिन् स्तरे सम्पाद्यते ?
    (1) माध्यमिकस्तरे (2) उच्चप्राथमिकस्तरे
    (3) उच्चतरमाध्यमिकस्तरे (4) उच्चस्तरे

41. पाठयोजनायां प्रस्तावनायाः उद्देश्यं किम् ?
    (1) छात्राणां मूल्याङ्कनम् (2) नूतनज्ञानप्रदानम्
    (3) छात्राणां नियन्त्रणम् (4) नूतनविषयस्याधिगमाय सिद्धतासम्पादनम्

42. हरबर्ट महोदयेन निर्मितायां पाठयोजनायां सोपानानि कति ?
    (1) 7 (2) 9 (3) 12 (4) 5

43. मूल्याङ्कनप्रश्नानाम् उद्देश्यम् इदम् -
    (1) छात्राणां सक्रियतासम्पादनम् (2) छात्राणाम् अनुशासनसम्पादनम्
    (3) छात्राणाम् अवबोधस्य परीक्षणम् (4) समययापनम्

44. माध्यमिकस्तरे संस्कृतशिक्षणस्य माध्यमं किं स्यात् ?
    (1) मातृभाषा (2) हिन्दी (3) आङ्ग्लभाषा (4) संस्कृतम्

45. छात्राणां पूर्वज्ञानेन सह नूतनज्ञानस्य सम्बन्धः अनेन सूत्रेण क्रियते -
    (1) सरलात् कठिनं प्रति (2) ज्ञातात् अज्ञातं प्रति
    (3) स्थूलात् सूक्ष्मं प्रति (4) विश्लेषणात् संश्लेषणं प्रति

46. हरबर्ट पाठयोजना सोपानेषु इदम् अन्तर्भवति -
    (1) तर्कः (2) लेखनम् (3) सन्नाहः (4) प्रतिपुष्टिः

47. स्पष्टता, सम्बन्धः, व्यवस्था, विधिः इति सोपानानि कस्याः पद्धतेः पूर्वरूपं वर्तते ?
    (1) हरबर्टपञ्चपदीपद्धतेः (2) ह्यूरिष्टिक्पद्धतेः
    (3) डाल्टन्पद्धतेः (4) किण्डरगार्टेनपद्धतेः

48. अधोलिखितकथनेषु किं सत्यम् ?
    (1) छात्राणां श्रवणकौशलविकासाय संस्कृताध्यापकः स्वयं संस्कृतेन व्यवहरेत् ।
    (2) छात्राणां भाषणकौशलविकासाय शिबिरविधेः उपयोगः नास्ति ।
    (3) छात्राणां लेखनकौशलविकासाय माण्टेसरीविधेरुपयोगो नास्ति ।
    (4) शब्दरूपधातुरूपकण्ठस्थीकरणाय आवृत्तिविधेः आवश्यकता नास्ति ।

49. हरबर्टपञ्चपद्यां प्रस्तावना इति कस्य नामान्तरम् ?

(1) स्पष्टतायाः नामान्तरम् (2) व्यवस्थायाः नामान्तरम्

(3) विधेः नामान्तरम् (4) प्रस्तुतीकरणस्य नामान्तरम्

---

50. अधोलिखितेषु वाक्येषु असत्यमुत्तरं चिनुत ।

(1) शान्तः आकारः यस्य तं शान्ताकारम् इति तुलनायुक्तेः उदाहरणम्

(2) भुजगे शयनं यस्य तं भुजगशयनम् इति उदाहरणं व्युत्पत्तियुक्तेः

(3) 'विष्णुर्नारायणकृष्णवैकुण्ठविष्टरश्रवाः' इति कोषयुक्तेः उदाहरणम्

(4) अण्डः, द्विजः, खगः, विहङ्गः इति पर्याययुक्तेः उदाहरणम्

---

51. संस्कृते वाक्यसंरचनाभ्यासार्थमुपयुक्तोपागमः -

(1) सम्प्रेषणोपागमः (2) संरचनात्मकोपागमः

(3) सान्दर्भिकोपागमः (4) प्रत्यक्षोपागमः

---

52. संस्कृतभाषायाः बोधनाभ्यासयोः संसाधनानि सन्ति -

A) चित्रपट्टिका

B) पर्यटनम्

C) भाषावल्लरी

D) वीथिनाटकम्

(1) A

(2) A B

(3) A C D

(4) A B C D

---

53. नाटकं भवति कस्योपरि आधारितम् ?

(1) श्रव्योपकरणम् (2) दृश्योपकरणम् (3) दृश्यश्रव्योपकरणम् (4) सूक्ष्मशिक्षणम्

---

54. संस्कृतविश्वविद्यालयेषु कस्मिन् विश्वविद्यालये प्रथमतया भाषाप्रयोगशाला संस्थापिता ?

(1) राष्ट्रियसंस्कृतसंस्थाने (2) राजस्थानसंस्कृतविश्वविद्यालये

(3) राष्ट्रियसंस्कृतविद्यापीठे (4) सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

---

55. संस्कृतभाषाभ्यासाय समुपयुक्तसाधनमिदम् -

(1) टङ्कणम् (2) ध्वनिमुद्रणयन्त्रम् (3) भाषाप्रयोगशाला (4) स्वगृहम्

---

56. पाठ्यपुस्तकस्य गुणेषु न वर्तते -
(1) व्यावहारिकः (2) सोद्देश्यः
(3) स्तरानुसारः (4) बृहदाकारः

57. PPT निर्माणं सम्भवम् -
(1) Excel द्वारा (2) Word file द्वारा
(3) MS Office PowerPoint द्वारा (4) Page Maker द्वारा

58. इदं नास्ति दृश्योपकरणम् -
(1) श्यामपट्टः (2) अध्यापकः
(3) पुस्तकम् (4) Over Head Projecter (OHP)

59. नायं पाठ्यपुस्तकस्य बाह्यगुणो वर्तते -
(1) चित्राणि (2) आकारः
(3) मूल्यम् (4) व्यवस्थितक्रमः

60. शिक्षणे किं प्रमुखं सहायकोपकरणम् ?
(1) श्यामफलकम् (2) संगणकम् (3) प्रत्यक्षसाधनम् (4) ध्वनिविस्तारयन्त्रम्

61. प्राथमिकस्तरे संस्कृतभाषायाः पाठ्यपुस्तकं भवेत् -
(1) सरलम् (2) आकर्षकम् (3) कठिनम् (4) बुद्धिवर्धकम्

62. छात्राणां सर्जनात्मकतायाः परीक्षणार्थम् उपयुक्ता परीक्षा -
(1) कक्षापरीक्षा (2) त्रयीमासिकी परीक्षा
(3) वार्षिकपरीक्षा (4) निबन्धात्मकपरीक्षा

63. किं नाम मापनम् ?
(1) मूर्तगुणानां विश्लेषणम् (2) मूर्तामूर्तगुणानां विश्लेषणम्
(3) अमूर्तगुणानां विश्लेषणम् (4) व्यवहारपरिमार्जनम्

64. निरन्तरमूल्यांकनस्य प्रमुखमुद्देश्यम् -
(1) कक्षोन्नतिः (2) अङ्कप्रदानम्
(3) व्यवहारपरिमार्जनम् (4) अमूर्तगुणानां मापनम्

65. छात्राणां धारणाशक्तेः परीक्षणाय उपयुक्ता परीक्षा -

(1) प्रायोगिकपरीक्षा (2) शलाकापरीक्षा

(3) लिखितपरीक्षा (4) वार्षिकपरीक्षा

---

66. छात्राणां सर्जनात्मकशक्तेः विकासाय परीक्षणं भवति -

(1) समग्रमूल्याङ्कनेन (2) समग्रसततमूल्याङ्कनेन

(3) निरन्तरमूल्याङ्कनेन (4) व्यवहारमूल्याङ्कनेन

---

67. मेलनं कुरुत

| | मूल्याङ्कनपद्धतिः | | उदाहरणानि |
|---|---|---|---|
| A) | अन्वितिपरीक्षा | i) | समग्रमूल्याङ्कनम् |
| B) | उपचारात्मकपरीक्षा | ii) | सततमूल्याङ्कनम् |
| C) | सत्रात्मकपरीक्षा | iii) | समग्रसततमूल्याङ्कनम् |
| D) | सुधारात्मक-निर्णयात्मकपरीक्षे | iv) | समाशोधनमूल्याङ्कनम् |

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | ii | iv | i | iii |
| (2) | iv | ii | iii | i |
| (3) | i | iii | iv | ii |
| (4) | iii | i | ii | iv |

---

68. मूल्याङ्कने मापनम् अन्तर्निहितं वर्तते इति कथनम् -

(1) सत्यम् (2) असत्यम् (3) अस्पष्टम् (4) आंशिकसत्यम्

---

69. मेलनं कुरुत ।

| | गुणाः | | मापकोपकरणानि |
|---|---|---|---|
| A) | मूर्तगुणाः | i) | वस्तुनिष्ठप्रश्नावलिः |
| B) | अमूर्तगुणाः | ii) | प्रक्षेपणविधिद्वारा |
| C) | मूर्तामूर्तगुणाः | iii) | निबन्धलेखनद्वारा |
| D) | विश्लेषणात्मकगुणाः | iv) | गणितीयपरीक्षणम् |

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | ii | i | iv | iii |
| (2) | iii | iv | i | ii |
| (3) | iv | iii | ii | i |
| (4) | i | ii | iii | iv |

70. कस्मिन् उपकरणे व्यक्तिनिष्ठतायाः आधिक्यं दृश्यते ?
(1) प्रश्नावलिः (2) निर्धारणमापनी
(3) साक्षात्कारः (4) लिखितपरीक्षा

71. ह्यूरिस्टिकविधेः प्रतिपादयिता वर्तते
(1) किल्पेट्रिक (2) हरबर्ट (3) आर्मस्ट्राङ्ग (4) फ्रोबेल

72. विशेषण-विशेष्यमुखेन अध्यापनं भवति -
(1) निगमनविधौ (2) क्रीडाविधौ
(3) दण्डान्वयविधौ (4) परियोजनाविधौ

73. वस्तुनिष्ठपरीक्षायाः आधिक्यं दृश्यते -
(1) मुक्तप्रश्नावल्याम् (2) साक्षात्कारे
(3) बद्धप्रश्नावल्याम् (4) उत्तरपुस्तिकायाम्

74. समावेशित-शिक्षायाः तात्पर्यम् -
(1) दूरस्थशिक्षणम् (2) बहुभाषीकक्षा
(3) विषयक्षेत्रीयबालकानां सामान्यकक्षायां समावेशः (4) असमर्थच्छात्राणां सामान्यकक्षायां योजनम्

75. समावेशितशिक्षा विशिष्टशिक्षायाः पूरकशिक्षा, इतिकथनम् -
(1) सत्यम् (2) असत्यम् (3) सत्यम् असत्यं च (4) अनिर्वचनीयम्

76. भाषाधिगमे बालकाः काः बाधाः अनुभवन्ति ?
A) क्षेत्रियताम्
B) स्वरतन्त्रिकायाः दोषम्
C) कक्षाप्रबन्धनदोषम्
D) अभ्यासाधिक्यम्
(1) A C D
(2) A B C D
(3) B C D
(4) A B C

77. असमर्थच्छात्राणां भाषाभ्यासे अधोलिखितेषु कारकेषु को न प्रभावयति ?
(1) मन्दबुद्धिः (2) बालापराधप्रवृत्तिः
(3) स्वरतान्त्रिकदोषः (4) उच्चबौद्धिकक्षमता

78. समावेशितशिक्षायाः कृते ध्यानं केन आयोगेन प्रप्रथमं दत्तम् ?
(1) राधाकृष्णायोगेन (2) कोठारी-आयोगेन (3) मुदलियार-आयोगेन (4) यशपाल-आयोगेन

79. भाषाधिगमबाधितानां बालकानां वर्गीकरणस्य माध्यमः अधोलिखितेषु न सम्बद्धः -
(1) ज्ञानात्मकयोग्यता (2) क्रियाशीलता
(3) भाषाबोधगम्यता (4) भाषाभिव्यक्तिः

80. अधिगमासमर्थबालकानां कक्षाप्रबन्धनसिद्धान्तेषु न प्रभावी -
(1) शिक्षणव्यूहः (2) विशिष्टकक्षासंघटनसिद्धान्तः
(3) समावेशीकक्षासंघटनम् (4) आकलनव्यूहसिद्धान्तः

81. भाषाधिगम-असमर्थच्छात्राणां वैशिष्ट्यं नास्ति -
(1) अतिक्रिया (2) संवेगात्मकप्रतिरोधः
(3) अवधानस्य अभावः (4) सामाजिकवञ्चना

82. प्रथमसंस्कृतभाषा-आयोगस्य अध्यक्षः -
(1) डॉ. सुनीतिकुमारचटर्जी (2) प्रो. सत्यव्रतशास्त्री
(3) डॉ. सर्वेपल्ली राधाकृष्णन् (4) डॉ. राजगोपालाचारी

83. प्रथमसंस्कृतभाषा-आयोगस्य समयः -
(1) 1951-52 (2) 1964-66 (3) 1956-57 (4) 1948-50

84. स्वतन्त्रभारते प्रथममाध्यमिकशिक्षा-आयोगः आसीत् -
(1) राधाकृष्णन्-आयोगः (2) राममूर्ति-आयोगः
(3) कोठारी-आयोगः (4) लक्ष्मणस्वामी मुदलियार-आयोगः

85. संस्कृतभाषायाः विकासाय प्रमुखा अशासकीया संस्था वर्तते -
(1) संस्कृतभारती (2) राष्ट्रियसंस्कृतसंस्थानम्
(3) प्रसारभारती (4) संस्कारभारती

86. ''संस्कृतविकासाय दीर्घकालिका दृष्टिः मार्गरूपरेखा'' (Vision and Road Map for the development of Sanskrit) इति नामिका समितिः कस्मिन् दिने मानवसंसाधनविकासमन्त्रालयेन रचिता ?
(1) 17-11-2015 (2) 18-11-2015
(3) 17-11-2016 (4) 18-11-2016

87. भारतीयशिक्षा-आयोगस्य (1964-66) अध्यक्षः आसीत् -

(1) प्रो. सर्वेपल्ली राधाकृष्णन् (2) प्रो. लक्ष्मणस्वामी मुदलियार

(3) प्रो. राममूर्तिः (4) डॉ. दौलतसिंह कोठारी

---

88. श्यामफलकाभियानेन (Operation Black Board) सह सम्बद्धा -

(1) प्राथमिकशिक्षा (2) माध्यमिकशिक्षा (3) उच्चशिक्षा (4) प्राविधिकशिक्षा

---

89. प्रथमतया त्रिभाषासूत्रं वर्णितमस्ति -

(1) कोठारी-आयोगे (2) लक्ष्मणस्वामी-मुदलियार-आयोगे

(3) राधाकृष्णन्-आयोगे (4) राममूर्ति-आयोगे

---

90. संस्कृतशिक्षणे सर्वोत्तमभाषाबोधनपद्धतिः वर्तते -

(1) अनुकरणपद्धतिः (2) श्रवणपद्धतिः (3) मननपद्धतिः (4) निदिध्यासनपद्धतिः

---

91. प्रारम्भकक्षासु छात्राणां संस्कृते श्रवणकौशलसम्पादने प्रमुखं साधनमिदम् -

(1) आकाशवाणी (2) दूरदर्शनम्

(3) भाषाप्रयोगशाला (4) गुरुमुखम्

---

92. संस्कृतभाषाशिक्षणे गद्यशिक्षणस्य प्रमुखोद्देश्यमस्ति -

(1) ज्ञानप्रदानम् (2) भावविनिमयः

(3) रसानुभूतिः (4) लेखनक्षमताविकासः

---

93. आरोहावरोहस्योपरि बलं दीयते -

(1) गद्यशिक्षणे (2) पद्यशिक्षणे

(3) नाटकशिक्षणे (4) कथाशिक्षणे

---

94. पद्यशिक्षणे प्रभावपूर्णविधिरस्ति -

(1) दण्डान्वयविधिः (2) अभिनयविधिः

(3) परिचर्याविधिः (4) परियोजनाविधिः

---

95. वैदिकशिक्षाव्यवस्थायां पद्यशिक्षणस्य उत्कृष्टः विधिः -

(1) प्रत्यक्षविधिः (2) पारायणविधिः

(3) पाठ्यपुस्तकविधिः (4) सूत्रविधिः

---

96. कठोपनिषदि कस्य शिक्षणविधेः प्रमाणं दृश्यते ?
    (1) परम्परागतविधिः (2) व्याख्यानविधिः
    (3) प्रश्नोत्तरविधिः (4) प्रत्यक्षविधिः

97. सस्वरवाचनम् आवश्यकं वर्तते -
    (1) पद्यशिक्षणे (2) नाटकशिक्षणे (3) गद्यशिक्षणे (4) व्याकरणशिक्षणे

98. पौराणिकविषयाणां शिक्षणं सारल्येन भवति -
    (1) गद्यशिक्षणविधिना (2) पद्यशिक्षणविधिना
    (3) नाटकशिक्षणविधिना (4) कथामाध्यमेन

99. कथाकथने उपयुक्तं शिक्षणकौशलम् -
    (1) प्रश्नकरणम् (2) व्याख्यानम् (3) पुनर्बलनम् (4) प्रेरकवैविध्यम्

100. नाटकशिक्षणार्थम् उपयुक्तविधिः -
    (1) प्रत्यक्षविधिः (2) अनुवादविधिः (3) अभिनयविधिः (4) व्याख्यानविधिः

**SPACE FOR ROUGH WORK**